तथा स्यात्तु तस्याग्रे पुण्यकर्म्मणः। मेरुमन्दरमात्रोऽपि राशिः पापस्य कर्म्मणः। गङ्गास्नानेन दग्धः स्यात्तूलराशिरिवानलैः” ब्रह्माण्डे “स्पृष्ट्वा स्वर्गमवाप्नोति पीत्वा ज्ञानमवाप्नुयात्। गङ्गास्नाने तु भक्त्या वै प्राप्नोति परमं पदम्” ब्रह्मवैवर्त्ते “गङ्गायां मौसलं स्नानं महापातकनाशनम्। अज्ञानात् स्वर्गसंप्राप्तिर्ज्ञानान्मुक्तिर्न संशयः”। पुण्यकालविशेषस्नानप्रकरणम् भविष्ये “द्वादश्यां श्रवणर्क्षेण अष्टम्यां पुष्ययोगतः। आर्द्रायाञ्च चतुर्दश्यां गङ्गास्नानं विशेषतः। वैशाखे पूर्णिमा या स्यान्माघे वै कार्त्तिके तथा। तथा माघी त्वमावास्या गङ्गास्नाने सुदुर्लभा। कृष्णाष्टम्यां सहस्रन्तु शतं स्यात् सर्वपर्वसु। अमावास्यादिने चैव सहस्रन्तु दिनक्षये। चन्द्रसूर्य्यग्रहे लक्षं व्यतीपाते त्वनन्तकम्” ब्राह्मे “चन्द्रसूर्य्यग्रहे चैव योऽवगाहति जाह्नवीम्। स स्नातः सर्वतीर्थेषु किमर्थमटते महीम्” स्मृतिः “इन्दोर्लक्षगुणं प्रोक्तं रवेर्दशगुणं तथा। गङ्गातोये तु संप्राप्ते इन्दोः कोटीरवेर्दश” (नन्दामहाव्यं शीवारुणीदशहरार्द्धोदयस्नानफलं तत्तच्छब्दे द्रष्टव्यम्)। मृद्धारणप्रकरणम् दानधर्मब्रह्माण्डाग्नेयेषु।

“जाह्नवीतीरसंभूतां मृदं मूर्द्ध्ना बिभर्त्ति यः। बिभर्त्ति रूपं सोऽर्कस्य तमोनाशाय केवलम्” तर्पणप्रकरणम् ब्रह्माण्डाग्नेयदानधर्मेषु “य इच्छेत् सफलं जन्म जीवनं श्रुतमेव च। सपितॄंस्तर्पयेद्गङ्गामभिगम्य सुरांस्तथा” अथ दानप्रकरणम् भविष्ये “वासो हिरण्यरत्नानि पत्रपुष्पफलानि च। अन्नदानादिकञ्चापि आत्मनो यदभीप्सितम्। तत्तु भक्त्या तु गङ्गायां यः प्रयच्छति मानवः। तत्तत्सुखमनन्तञ्च सम्प्राप्य चेह जन्मनि। प्रेत्य चाप्नोति निर्वाणं परमं यन्निरञ्जनम्। यज्ञोदानं तपो ज्ञानं श्राद्धञ्च सुरपूजनम्। गङ्गायान्तु कृतं सर्वं कोटिकोटिगुणं भवेत्” व्रतप्रकरणम् ब्रह्माण्डे “शालितण्डुलप्रस्थेन द्विप्रस्थपयसा तथा। पायसं पाचयित्वा तु मधुखण्डं घृतं तथा। प्रत्येकं पलमात्रन्तु तत्र निक्षिप्य भक्तितः। तत् पायसमपूपञ्च लड्डुकान् यावकानपि। तथा गुञ्जार्द्धमात्रन्तु सुवर्णं रूप्यमेव च। चन्दनागुरुकर्पूरकुङ्कुमानि च गुग्गुलुम्। विल्वपत्राणि दूर्वाञ्च रोचनां सितसर्षपम्। नीलोत्पलस्य पत्राणि पत्राभावे फलानि च। यथा शक्त्या महाभक्त्या गङ्गायां यो विनिक्षिपेत्। मासि मासि पौर्णमास्यां

दर्शे वा प्रहरद्वये। अनयानेन मन्त्रेण यावत् संवत्सरं तथा। (ओं गङ्गायै नारायण्य ते नमो नमः)। इति मन्त्रेण सततं शतमष्टोत्तरं जपेत्। गङ्गाजलान्तर्भूत्वा तु तन्मनास्त्यक्तसंशयः। हविष्याशी मिताहारी यमी तेषु दिनेषु च। संवत्सरान्ते तस्यैषा गङ्गा दिव्यवपुर्धरा। दिव्यमाल्याम्बरधरा दिव्यगन्धानुलेपना। चारुरूपधरा देवी दिव्यरत्नविभूषिता। प्रत्यक्षरूपा पुरतस्तिष्ठत्येव वरप्रदा। एवं प्रत्यक्षतः साक्षात् गङ्गां दिव्यवपुर्धराम्। दृष्ट्वा स्वचक्षुषा मर्त्यो वरदानसमुद्यताम्। यान् यान् कामयते कामांस्तांस्तान् सर्वानवाप्नुयात्। निष्कामस्तु परं मोक्षं लभते नात्र संशयः” श्राद्धप्रकरणम् भविष्ये “गयाश्राद्धं कृतं तेन उत्सृष्टश्च वृषस्तथा। येन गङ्गाम्भसा सिक्ते तीरे श्राद्धमकारि च। पितॄनुद्दिश्य यो भक्त्या पायसं मधुसंयुतम्। गुड़सर्पिःसमायुक्तं गङ्गाम्भसि विनिक्षिपेत्। तृप्ताः पिबन्ति पितरस्तस्य वर्षशतत्रयम्” देवीपुराणे “अकालेऽप्यथ वा काले तीरे श्राद्धं तथा नरैः। प्राप्तैरेव सदा कार्य्यं कर्त्तव्यं पितृतर्पणम्” अथ पिण्डप्रकरणम् देवीपुराणे “सकृद्गङ्गाभिगमनं कृत्वा पिण्डं ददाति यः। तारिताः पितरस्तेन भवाम्भोधेस्तिलोदकैः।” तत्रैव “गङ्गायाञ्च गयायाञ्च पिण्डदानं समं स्मृतम्। विशेषतः कलियुगे गङ्गापिण्डं प्रशस्यते। गङ्गायां पिण्डदानेन पितरस्तु तिलोदकैः। नरकस्था दिवं यान्ति स्वर्गस्था मोक्षमाप्नुयुः। माहेन्द्रे विरजे चैव गयायां जाह्नवीतटे। अत्र पिण्डप्रदो याति ब्रह्मलोकमनामयम्” जलप्रकरणम् ब्राह्मे “योऽसौ निरञ्जनो देवश्चित्स्वरूपी जनार्द्दनः। स एव द्रवरूपेण गङ्गाम्भो नात्र संशयः”। लैङ्गे “ब्रह्महा गुरुहा गोघ्नस्तेयी च गुरुतल्पगः। गङ्गाम्भसा च पूयन्ते नात्र कार्य्या विचारणा”। ब्राह्मे “तिष्ठद्युगसहस्रन्तु पादेनैकेन यः पुमान्। मासमेकन्तु गङ्गाम्भः सेवते स विशिष्यते। मेरोः समुद्रस्य च रत्नराशेः संख्योपलानामुदकस्य वाचा। शक्यं वक्तुं नेह गङ्गाजलानां गुणाख्यानं परिमाणं तथैव” तोयदानप्रकरणम् भविष्ये “अन्नदानैश्च गोदानैश्च स्वर्णदानादिभिस्तथा। रथाश्वगजदानैश्च यत्फलं परिकीर्त्तितम्। ततः शतगुणं गङ्गातोयदानादवाप्नुयात्” महाभारते “चान्द्रायणसहस्रेण यश्चरेत् कायशोधनम्। यः पिबेद्वै यथेष्टञ्च गङ्गाम्भः स विशिष्यते। गङ्गा-